'समानो मन्त्रः समितिः समानी'

# UNIVERSITY OF NORTH BENGAL

B.A. Honours 3rd Semester Examination, 2023

## CC6-SANSKRIT (306)

Time Allotted: 2 Hours Full Marks: 60

*The figures in the margin indicate full marks.*

### विभाग-क

1. संस्कृतभाषया देवनागरीलिप्या च ***एकस्य*** उत्तरं प्रदेयम् — 12×1 = 12

(क) स्वप्नवासवदत्तम् इति नाटकमवलम्ब्य मन्त्रिणः यौगन्धरायणस्य भूमिका आलोचनीया।

(ख) 'स्वप्नवासवदत्तस्य दाहकोऽभून्न पावकः'— उक्तेः तात्पर्यम् आलोचयत।

2. संस्कृतभाषया देवनागरीलिप्या च ***एकस्य*** व्याख्या कार्या — 6×1 = 6

(क) प्रद्वेषो बहुमानो वा संकल्पादुपजायते।
भर्तृदाराभिलाषित्वादस्यां मे महती स्वता॥

(ख) यदि तावदयं स्वप्नो धन्यमप्रतिबोधनम्।
अथायं विभ्रमो वा स्याद् विभ्रमोह्यस्तु मे चिरम्॥

3. बङ्गभाषया आङ्गलभाषया वा अनुवादः कार्यः (***द्वयोः***) — 3×2 = 6

(क) तीर्थोदकानि समिधः कुसुमानि दर्भान्
स्वैरं वनादुपनयन्तु तपोधनानाम्।
धर्मप्रिया नृपसुता न हि धर्मपीडा–
मिच्छेत् तपस्विषु कुलव्रतमेतदस्याः॥

(ख) सविश्रमो ह्ययं भारः प्रसक्तस्तस्य तु श्रमः।
तस्मिन् सर्वमधीनं हि यत्राधीनो नराधिपः॥

(ग) खगा वासोपेताः सलिलमवगाढो मुनिजनः
प्रदीप्तोऽग्निर्भवति प्रविचरति धूमो मुनिवनम्।
परिभ्रष्टो दुरात् रविरपि च संक्षिप्त किरणो
रथं व्यावर्त्यासौ प्रविशति शनैरस्तशिखरम्॥

4. संस्कृतभाषया देवनागरीलिप्या च ***प्रश्नद्वयं*** समाधेयम् — $3\times2 = 6$

(क) कः आसीत् महासेनः ? का च आसीत् अङ्गारवती ?

(ख) 'भर्तृदारिके दत्तासि'– केनोक्तम् ? का कस्मै दत्ता ?

(ग) का आसीत् पद्मावती ? वासवदत्तया सह तस्याः सम्पर्कः कीदृशः आसीत् ?

## विभाग-ख

5. अधोलिखितेषु कस्यापि ***एकस्य*** उत्तरं देयम् — $12\times1 = 12$

(क) 'अभिज्ञानशकुन्तलम्' इति नाटके ऋषेः दुर्वाससः शापवृत्तान्तस्य तात्पर्यमालोचयत।

(ख) 'अभिज्ञानशकुन्तलम्' इति नाटकस्य नामकरणस्य सार्थकता आलोचनीया।

6. संस्कृतभाषया देवनागरीलिप्या च ***एकस्य*** व्याख्या कार्या — $6\times1 = 6$

(क) सरसिजमनुविद्धं शैवलेनापि रम्यम्
मलिनमपि हिमांशोर्लक्ष्म लक्ष्मीं तनोति।
इयमधिकमनोज्ञा वल्कलेनापि तन्वी
किमिव हि मधुराणां मण्डनं नाकृतीनाम्॥

(ख) मानुषीषु कथं वा स्यादस्य रूपस्य सम्भवः।
न प्रभातरलं ज्योतिरुदेति वसुधातलात्॥

7. संस्कृतभाषया देवनागरीलिप्या च ***प्रश्नद्वयं*** समाधेयम् — $3\times2 = 6$

(क) अभिज्ञानशकुन्तले विदूषकस्य नाम किम् ? केषु अङ्केषु विदूषकस्य आविर्भावः परिलक्ष्यते ?

(ख) 'असाधुदर्शी खलु तत्रभवान् काश्यपः' — कस्य मन्तव्यम् ? काश्यपस्य विषये किमर्थम् एवम् अभिमतम् ?

(ग) किं नाम भरतवाक्यम् ? 'अभिज्ञानशकुन्तलम्' इति नाटकस्य भरतवाक्ये कस्याः देवतायाः स्तुतिरस्ति ?

8. श्लोकपादपूरणं कुरुत (***एकस्य*** देवनागरीलिप्या) — $6\times1 = 6$

(क) प्रवर्ततां प्रकृतिहिताय पार्थिवः
-----------------------------।
----------------------------
----------------------------॥

(ख) चित्रे निवेश्य परिकल्पितसत्त्वयोगा
-----------------------------।
----------------------------
----------------------------॥

——×——